International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(5): 76-77
© 2018 IJSR
www.anantaajournal.com
Received: 27-07-2018
Accepted: 28-08-2018

**D Hemalatha**
Research Scholar, Dept. of Sanskrit, S.V. University, Tirupati, Andhra Pradesh, India

**Correspondence**
**D Hemalatha**
Research Scholar, Dept. of Sanskrit, S.V. University, Tirupati, Andhra Pradesh, India

# कथासाहित्यप्रपञ्चे पञ्चतन्त्रग्रन्थस्य लोकप्रियत्वम

**D Hemalatha**

**प्रस्तावना**

पञ्चतन्त्रस्य महती लोकप्रीतिभाजनताऽनेनैव स्फुटा यदस्याति पञ्चाशद्भाषा-स्वतिद्विशतविविधसंस्करणानि लभ्यन्ते। पञ्चतन्त्रशाखिन एतावतः शाखाविस्तारस्य प्रायस्त्रिचतुर्थांशाः भारताद् बहिः प्रसृताः। ११०० तमे खीष्टाब्दे हिब्रुभाषायामस्य भाषान्तररूपमजनि। आ १५७० तमात् खीष्टाब्दाच्च ग्रीक-स्पेनिश-लैटिनेश्टैलियन-जर्मन-पुरातनस्लैवौनिक-जैकाङ्ग्लभाषास्वितदमनूदितं जातम्। अद्यत्वे आयवद्वीपात् (from Java) आइसलैण्डपर्यन्तं खल्वस्य प्रचारः प्राप्यते।

भारते तु चिरादेत अधिकतरमस्य लोकप्रियत्वं प्रवर्तमानं प्राप्यते। एतद्धि अपभ्रंशादिषु प्राचीनासु हिन्दीप्रभृतिष्वद्यतनीषु च भाषास्वनूदितं भूत्वा भूयः संस्कृतभाषायामनूदितं दृश्यते। अस्य पद्यबद्धं रूपं भूत्वा पुनर्गद्यबद्धं रूपं जातम्। एतत् संकोचं विकासं चाप्तवान्। अस्य बह्व्यः कथाः सर्वसाधारणजनकथारूपेण प्रचरिता भूत्वा पुनः अद्यतनमौखिककथारूपेण सङ्गृहीताः सन्ति। एवं गते 'भूतले न धर्मग्रन्थान् विहाय लौकिकेन ग्रन्थान्तरेणैतावान् लोकसमादरोऽधिगतः' इति वचनं कः प्रत्यवतिष्ठेत।

**पञ्चतन्त्रस्य नानाशाखा**

अहो बत आद्यं पञ्चतन्त्रं कथासु केवलमवशिष्टम्। कीदृशं आद्यस्य पञ्चतन्त्रस्य स्वरूपमासीदिति त्वस्यनानाशाखीयैरूपलभ्यमानै रूपैरंशतोऽनुमातुं सुशकम्। तेषां हि परस्परतया ज्ञायते यत्-

(क) तेषां सर्वेषां योनिः समाना एव (अन्यथा तेषां गद्यखण्डेषु पद्येषु च प्राप्यमाणं प्राथिकमैकरूप्यं कथं नु समाधेयं स्यात्।

(ख) अपि च एषु रूपेषु ये दोषा दृश्यन्ते न ते अनुस्त्रियमाणाः सन्त आद्यग्रन्थं प्रत्युपयन्ति। इति।

अथ वक्ष्यमाणा ग्रन्था आद्यस्य पञ्चतन्त्रस्वरूपस्य विज्ञाने उपकुर्वन्ति-

१) क - तन्त्राख्यायिका।

ख - ११०० तम ख्रीष्टाब्दासन्नकाले केनचिद् जैनेन रचितः 'सरलग्रन्थ' (Textus Simplicior) इति संज्ञितः पञ्चतन्त्रग्रन्थः।

२) क - दक्षिणापथीयं पञ्चतन्त्रम्।

ख - नेपालीयं पञ्चतन्त्रम्।

ग - हितोपदेशः

३) क्षेमेन्द्रेण सोमदेवेन च प्रस्तुतं बृहत्कथागतं पञ्चतन्त्रवर्णनम्।

४) पह्लवीभाषानिबद्धं पञ्चतन्त्रम्। सर्वपाश्चात्येषु देशेषु प्रचरितं पञ्चतन्त्रमेतत् पञ्चतन्त्रोपजीव्यकं खलु।

ऐजर्टन (एवसर्शीप) महाशयेन पञ्चतन्त्रसाहित्यस्यानुशीलने महान् आयासः खलु अर्जितः। तन्मेतन पञ्चतन्त्रस्य पूर्वोक्ता इमाश्चतस्र स्वतन्त्रशाखाः सन्ति। हर्टल मतेन तु केवलं द्वे एव। एतयोर्मतयोरन्योन्यभेदं प्रदर्शयितुमधस्तात् सारणी एका उपन्यस्यते-

यत् आद्यपञ्चतन्त्रस्वरूपस्य ज्ञानमेतन्मतद्वयभेदाश्रितं तस्मात् तदेतन्मतद्वयभेदा विशेषेणावधेयतां गच्छन्ति। तथाहि -

(अ) हर्टलमते सर्वेषामुपलब्धानां पञ्चतन्त्रस्य नानारूपाणां विकृतिमापन्नं मूलं समानं, तच्च तेन 'त' इति संज्ञया व्यवह्रियते। ऐजर्टनमते तु कल्पनामात्रं खल्वेतत्।
(आ) हर्टलमते आद्यमूलादनन्तरं मध्यमूलमप्येकमासीद् यस्मात्, तन्त्राख्यायिकां केवलां वर्जयित्वा, सर्वाणि शाखान्तराणि प्ररूढानि। एतद् मध्यमूलं तेन 'क' संज्ञा व्यवहृतम्। ऐजटर्नस्य मते तु आद्यमूलवदेतद् मध्यमूलमपि वक्तुर्मानसिकमबीजसर्गमात्रम्। हर्टलमते तत् तदेव गद्यखण्डं पद्यं वा मौलिकं भवितुमर्हति यद् यत् तन्त्राख्यायिकायां वा 'क' शाखायाः प्ररोहेष्वेकस्मिन्नपि वोपलभ्यमानं स्यात्। ऐजर्टनमते तु स्वतन्त्रयोरुभयोः शाखयोरेकस्मिन्नपि संस्करणे यद् यत् पद्यं गद्यखण्डं वा लभ्यते तत् तन्मौलिकमेव खलु, तन्त्राख्यायिकायां तस्य उपलम्भानुपलम्भौ अप्रयोजकौ।
(इ) हर्टलस्य मते दक्षिणापथीयस्य पह्लवीभाषामयस्य सरलग्रन्थसंज्ञितस्य च पञ्चतन्त्रस्य मूलभूतमुत्तरपश्चिमीयं यतृ पञ्चतन्त्रमैजर्टनस्य मते तत्सद्भावे प्रमाणं नास्ति।
हर्टलेन उत्तरपश्चिमीयसंज्ञकादेकस्माद्, मूलाद् दक्षिणापथीयपह्लवीसरलग्रन्थेति-शाखात्रयविभक्तस्य पञ्चतन्त्रस्य या उत्पत्तिः कल्पिता न केवलं सैव तेषां परस्पर-सादृश्यानुशीलनाद् मिथ्या भाति, अपितु परस्परनिरपेक्षितायाः पञ्चतन्त्रसम्प्रदायस्य रूढित्रय्या इयं शाखात्रयी प्रादुर्भूतेत्यपि च सिध्यति।
यथा हर्टलः प्रतिपादयति यदि तथैकमूलोद्गता दक्षिणापथीय-पह्लवी-सरलग्रन्थेति नाम्न्यस्तिस्रः शाखाः, तर्हि सरलग्रन्थतन्त्राख्याधिकयोर्मध्ये वा सरलग्रन्थ-पूर्वभद्रीयग्रन्थयोर्मध्ये वा तथा सादृश्येन न भवितव्यं' यथा पह्लवी-सरलग्रन्थयोर्मध्ये, अवस्था तु विपरीता खलु दृश्यते। पुनश्च हर्टलसिद्धान्तेन हितोपदेश-पूर्णभद्रीयग्रन्थयोर्मध्ये यथा साम्येनावश्यं भवितव्यं न तथा हितोपदेश-दक्षिणापथीयपञ्चतन्त्रयोर्मध्ये, न चैवं दृश्यते तस्मादप्रामाणिक्यः खलु हर्टलवाचोयुक्तय इति फलितं भवति।

**प्रणेता:** विष्णुशर्मा नाम कश्चित् पण्डितो महिलारोप्याधिपतेर्नृपामरशक्तेस्त्रीन् पुत्रान् षड्भिर्मासैः राजनीतिं शिक्षयितुं स्वीकृतवानिति तावत् पञ्चतन्त्रभूमिकातो ज्ञायते। अत्र विष्णुशर्मा एव खल्वस्य सन्दर्भस्य प्रणेता इति च पञ्चतन्त्रभूमिकायां तृतीये पद्ये स्पष्टमभिहितम्। कल्पिता विष्णुशर्मेति संज्ञा इति तु साहसमात्रमेव। बत् संस्तवस्तु विष्णुशर्मणोऽस्य न कोऽपि आसाद्यते। भूमिकायां तेन नानादेवानां स्तवनादुदारमना ब्राह्मणः खलु स बभूव न तु जैनो वा बौद्धो वा इत्येतावदेव केवलमनुमातुं शक्यम्।

**पञ्चतन्त्रस् उद्भवस्थानम्:** आद्यपञ्चतन्त्रजन्मभूविषये न तावत् किमपि तात्त्विकं विदितम्। मौलिके सन्दर्भे हस्तिसिंहयोर्नामधेयस्यानुपलम्भादुष्ट्रस्य चाभीक्ष्ण्येन वर्णनात् कश्मीरदेशः खल्वाद्यस्य पञ्चतन्त्रस्य जन्मभूरिति यद् हर्टलमहाशयेन तर्कितं न तद् वस्तुतस्तर्कसहम्। कांसाचिद् यात्राणां यानि नामधेयानि अत्रोपलभ्यन्ते, सर्वत्र भारते वर्षे तत्प्रसिद्धेर्न तान्यपि कञ्चन पक्षं सुप्रतिष्ठापयितुं क्षमाणि। महिलारोप्यनाथोऽमरशक्तिर्नाम नृपो न कर्तृकल्पनामात्रं चेत् तर्हि दाक्षिणात्यो नूनं पञ्चतन्त्रकर्तेत्यास्थीयेत। पञ्चतन्त्रे वर्ण्यमान ऋष्यमूको नाम पर्वतो दक्षिणापथे स्थित इत्येतेनापि मतमिदं सम्यक् समर्थितं भवति।

**वर्ण्यवस्तुरूपरेखा**

इह मित्रलाभ-सुहृद्भेद-विग्रह-सन्धि नामानश्चत्वारः सङ्ग्रहाः सन्ति। आद्यपञ्चतन्त्रस्य प्रथमद्वितीयतन्त्रे अत्र क्रमेण द्वितीयप्रथमे कृते। पञ्चतन्त्रस्य चतुर्थं तन्त्रं परित्यज्य तृतीयपञ्चमतन्त्रे यथाक्रमं विग्रहसन्धिनामकयोः सङ्ग्रहयोरभिनवरूपता नीते। सन्धिनामके सङ्ग्रहे नूत्ना एका कथा योजिता पञ्चतन्त्रस्य च प्रथमतृतीयतन्त्राभ्यां कतिपयानि कथान्तराण्युद्धृत्येह धृतानि। तदेवं संयोजनवियोजनव्यत्यसनैः शिल्पिते हितोपदेशे पञ्चतन्त्रस्य पद्यभागस्य प्रायेण तृतीयांशे गद्यभागस्य च द्वौ पञ्चमांशौ समागतौ।

**शैली**

बालानां संस्कृतस्य नीतिविद्यायाश्च शिक्षायै हितोपदेशो निबद्धः तस्माद् यथोद्देश्यं भाषाऽस्य सरला स्वच्छा रुचिरा च। दीर्घसमासक्लिष्टरचनयोः प्रयोगो यदि क्वचिद् विलोक्यते तर्हि, उद्धृतेषु पद्येष्वेव। पाश्चतन्त्रिकीं पद्धतिमनुसरताऽस्य रचयित्राऽपि तिङन्तस्थाने प्रायः कृदन्ता एव प्रयोगाः प्रयुक्ताः। एतत्कर्तुः कृतित्वेन प्रतीयमानेभ्यः कतिपयेभ्यः पद्येभ्यस्तस्य सुकवित्वं स्फुटी भवति। न केवलं वङ्गेष्वेव प्रत्युत भारते सर्वत्र हितोपदेशस्य सुप्रचरितत्वाद् बङ्गाली-हिन्दी-प्रभृतिषु नानाधुनिकभारतीयभाषास्वस्यानुवादा अजायन्त। अधोऽवतार्यमाणैर्गद्यपद्यैरस्य भाषासारल्यं स्पष्टम्।
तद् भवतां विनोदाय काककूर्मादीनां विचित्रां कथां कथयामि। राजपुत्रैरुक्तं कथ्यताम्। विष्णुशर्मोवाच श्रूयतां सम्प्रति मित्रलाभः यस्यायमाद्यः श्लोकः।

माता शत्रुः पिता वैरी येन बालो न पाठितः।
न शोभते सभामध्ये हंसमध्ये बको यथा॥
यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत्।
एवं पुरुषकारेण विना दैवं न सिध्यति॥
(साहित्येतिहासः,पृ.सं.,१८४)